**International Journal of Advanced Education and Research**
**ISSN: 2455-5746, Impact Factor: RJIF 5.34**
**www.alleducationjournal.com**
**Volume 2; Issue 2; March 2017; Page No. 58-59**

# उज्ज्वलदत्तोणादिवृत्तौ स्मृताः ग्रन्थकाराः

**डॉ. दोलामणिः आर्यः**
सहायक–प्राध्यापक, लक्ष्मीबाई महाविद्यालय, दिल्ली विश्वविद्यालय, दिल्ली, भारत।

**प्रस्तावना**

अपारशब्दशास्त्रस्योपलब्धये सुविशालशब्दानुशासनमपि सर्वथा न समर्थ इति शब्दानुशासनस्य निदर्शनमात्रत्वम् अखिलैरपि ऊररीक्रियते। अत एव व्याकरणस्य सर्वाङ्गपूर्णत्वद्योतनाय पञ्चाङ्गव्याकरणमिति व्यवहारो दरीदृश्यते। व्याकरणस्य पंचाङ्गानि सन्ति– शब्दानुशासनम् (सूत्रपाठः), धातुपाठः, गणपाठः (प्रातिपदिकपाठः), उणादिपाठः लिङ्गानुशासनञ्च। नैगमानां रूढिशब्दानाञ्च बोधने उणादिसूत्राणाम् उपादेयत्वात् तेषां स्वल्पकायप्रकृतिप्रत्ययविभागस्य निदर्शकमात्रत्वम्। अत एव आचार्येण पाणिनिना 'उणादयो बहुलम्' इति ते प्रत्ययाः बहुलपदेन ज्ञापिताः। यतो हि उणादिप्रत्ययाः समासतोऽल्पप्रकृतिभ्यो विहिताः, प्रत्यया अपि प्रायेण समुच्चिता, प्रकृतिप्रत्ययविकारजन्यकार्याण्यपि च न विशेषतया समुपस्थापितानि। अत एव महाभाष्ये भाष्यकारः पतञ्जलिराह –

**बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायः समुच्चयनादपि तेषाम्।**
**कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु।।**
**नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्।**
**यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्।।**
**संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।**
**कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु।।**

समुपप्राप्तेषूणादिवृत्तिषु पञ्चपाद्युणादिदशपाद्युणादिसूत्राणि प्राचीनतमानि। पाणिनीयपरम्परायाञ्चोभावपि समादृतानि। पञ्चपाद्युणादिसूत्राणि बहुभिराचार्यैः व्याख्यातानि तेषु व्याख्यातृषूज्जलदत्तोऽन्यतमः। महावैयाकरणेन उज्ज्वलदत्तेन विरचिता उणादिवृत्तिरुपलब्धोणादिवृत्तिष्वेका आद्यतमा अन्यतमा च।

वृत्तिरियं पञ्चपाद्युणादिसूत्राणां वृत्तिरुदाहरणोद्धरणसमालोचनापुरस्सरं सर्वाङ्गपूर्णं रुचिकरं व्याख्यानं प्रस्तौति। अत्र साक्षात् प्राचीनोणादिवृत्तिकाराणां वृत्तेरुल्लेखः, कोशानां कोशकाराणाञ्च निदर्शनं, भूरिशः साहित्यग्रन्थाः साहित्यकाराश्च स्मर्यन्ते। अस्यां वृत्तौ प्राचीनतमाः अनेके ग्रन्थाः तेषामुद्धरणञ्च समुपलभ्यन्ते। ते च सन्ति –

**उज्ज्वलदत्तोणादिवृत्तेर्वैशिष्ट्यम्** – इयं खल्वुणादिसूत्राणां वृत्तिरुदाहरणं, उदाहरणानां साहित्यिककोशगतसन्दर्भाः, बाहुल्येन शब्दसाधुत्वप्रदर्शनप्रकारो वृत्तिन्यासानुन्यासादीनां समीक्षापूर्वकं रुचिकरं सारगर्भितं च व्याख्यानं प्रस्तौति। अस्याः कतिपयवैशिष्ट्यानि सन्ति –

1. अत्र साक्षात् प्राचीनोणादिवृत्तिकाराणां वृत्तेरुल्लेखो वर्तते। यथा– देववृत्तिः (उणा० 3.98, 101, 117, 140; 5.61), गोवर्धनवृत्तिः (उणा० 4.69), सूतीवृत्तिः (उणा० 3.140), नग्नवृत्तिः (उणा० 4. 66), प्राचीनवृत्तिः (उणा० 2.32)।
2. केचिदादिपदेनानुपलब्धानां वृत्तीनां वृत्तिकाराणाञ्चात्र सङ्केतो विद्यते। यथा – अन्ये (उणा० 1.121, 2.28, 3.38), अपरे (उणा० 1.115), एके (उणा० 1.150), एकीयमतेन (उदा० 2.57), केचित् (उणा० 1.115; 144; 2.107; 4.2; 5.21), काचिद्वृत्तिः (उणा० 1. 128–130; 3.16)।
3. अनेकेषां वैयाकरणानां मतसमीक्षणमत्र बहुत्र दरीदृश्यते। यथा – 'तपसस्तापस इति देववृत्तौ प्रमादः' (उणा० 3.117), सूत्रमिदं न्यासकारस्यासम्मतम् (उणा० 1.26), ञकारान्तः सौत्रो धातुरूह्यत इति... सूत्रे रक्षितः (उणा० 1.106), वातप्रमीति सुलोपोऽपि भवतीति दुर्घटे रक्षितः (उणा० 4.1) इत्यादयः।
4. अत्र बहुविधानां दुर्लभानां कोशानां कोशकाराणाञ्च निदर्शनं प्राप्यते। यथा– रत्नमतिः (उणा० 1.51), रत्नकोशः (उणा० 2. 40), गोपालितः (उणा० 3.22; 4.1, 29), वोपालिनः (उणा० 4.55, 78), अचलकोशः (उणा० 3.68)। अमरकोशादीनाञ्च सर्वत्रोद्धरणानि सुलभानि।
5. अत्र भूरिशः साहित्यग्रन्थाः साहित्यकाराश्च स्मर्यन्ते। दिङ्मात्रं यथा – राजशेखरः (उणा० 3.76), वृन्दावनयमकम् (उणा० 1.28, 78, 121), सूर्यशतकम् (उणा० 2.15, 96), भट्टिः (उणा० 1.108), भारविः (उणा० 1.95), माघः (उणा० 1.3), कुमारसम्भवम् (उणा० 2.39) इत्यादयोऽनेकेऽत्र स्मृताः।

**उज्ज्वलदत्तवृत्तौ स्मृताः ग्रन्थकाराः**

| ग्रन्थकाराः | सूत्रसंख्या |
|---|---|
| अजयः | 2.103 |
| अन्ये | 1.121, 156; 2.28; 3.28 |
| अपरे | 1.115 |
| अभिनन्दः | 1.2, 48; 2.103 |
| अमरदत्तः | 4.85 |
| अरुणदत्तः | 3.159; 4.117, 184 |
| आपिशलिः | 1.18; 4.174 |
| इन्दुमित्रः | 2.84 |
| एके | 1.150 |
| कलिङ्ग | (मङ्गला०) 1.68; 2.75; 3.126; 4.62; 5.48 |
| कविराजः | 1.96 |
| कालिदासः | 1.5; 2.68, 110; 3.23, 76; 4.188 |
| कुमारिलः | 1.11 |

| | |
|---|---|
| गोपदन्तः | 4.16 |
| गोपालितः | 3.22; 4.1, 29 |
| गोवर्धनः | 2.107; 3.40; 4.20, 117, 213; 5.19 |
| चन्द्रः | 1.41, 90, 123, 129; 2.57, 99, 103; 3.62; 5.15 |
| चन्द्रगोमी | 4.78, 107, 184 |
| छात्रमित्रः | 3.70 |
| जयादित्य० (जयादित्यः) | 1.52 |
| जिनेन्द्रबुद्धिः | 4.146 |
| दामोदरः | 1.28 |
| विदेहाधिपः | 4.195 |
| देवः (पुरुषोत्तमदेवः) | 4.109 |
| धरणिः (धरणिकोशकारः) | 1.4, 23, 24, 28; 2.27, 66, 75; 3.42; 4.68, 107, 158; 5.70 |
| नागार्जुन० (नागार्जुनः) | 4.121 |
| न्यासकारस्य | 1.26 |
| न्यासकृत् | 1.153 |
| पुरुषोत्तमदेवः | 2.25, 49; 3.1, 86, 90, 91, 98 |
| भट्टिः | 1.1, 2, 108, 129; 2.39, 68; 3.66, 90, 155; 4.100, 103, 117, 179 |
| भवभूतिः | 4.18 |
| भागवृत्तिः | 4.41 |
| भागुरिः | 1.113; 2.57; 3.132 |
| भारविः | 1.95; 2.15, 75; 3.5; 4.66; 109, 144, 190, 205; 5.35, 58 |
| माघः | 1.3, 23, 24, 64, 82, 123, 139, 141, 145; 2.78, 84, 109; 3.89; 4.49, 85, 124, 137, 138, 150, 188, 218; 5.35; 56 |
| मुरारिः | 4.171; 5.19 |
| मेदिनीकरः | 1.101 |
| रक्षितः (मैत्रेयरक्षितः) | (मङ्गला०) 1.26, 38, 106, 113; 2.12, 90; 4.2, 51, 142, 177, 200 |
| रक्षितः (दुर्घटवृत्तिकारः) | 2.27; 3.160; 4.1 |
| रन्तिदेवः | 2.27; 4.52, 138, 188 |
| रभसः | 1.51; 4.70, 110, 188; 5.6 |
| राजशेखरः | 3.76 |
| रुद्रः | 4.144 |
| वराहः | 3.86; 5.8 |
| वाचस्पतिः | 4.129, 233 |
| वामनः | 1.52 |
| विक्रमादित्य० (विक्रमादित्यः) | 1.95; 2.15 |
| विदग्धः | 1.108 |
| विनीतकीर्त्तिः | 2.58 |
| वोपालितः | 4.55, 78 |
| व्याडिः | 1.151 |
| व्यासः | 2.79; 4.165 |
| शबरस्वामी | 4.117 |
| शाश्वतः | 1.117; 2.28; 3.62, 136; 4.14, 20; 5.32 |
| सागरनन्दी | 4.121 |
| सुबन्धुः | 1.28; 2.25, 69; 3.72, 92 |
| सुभूतिः (सुभूतिचन्द्रः) | (मङ्गला०) 1.28; 2.10, 85, 111; 3.42; 4.1, 12, 52, 200; 5.70 |
| सुवर्णरेखः | 3.136 |
| सोमनन्दिनम् | (मङ्गला०) |
| हट्टचन्द्रः | (मङ्गला०) 1.3, 19, 42; 4.101, 158; 5.31 |
| हलायुधः | 1.46 |